JHARKHAND
ACADEMIC COUNCIL

MODEL QUESTION PAPER

2023

aglasem.com

झारखण्ड शैक्षिक अनुसन्धान एवं प्रशिक्षण परिषद्, राँची

वार्षिक-परीक्षा (2022-23) (आदर्श-प्रश्न-पत्रं MCQ)

कक्षा- नवमी | विषय:-संस्कृतम् | समय:-सार्ध-एक-होरा | पूर्णांकः-40

****

सामान्य-निर्देशाः-

1. अस्मिन् प्रश्नपत्रे सर्वे चत्वारिंशत् (40) प्रश्नाः सन्ति।

2. प्रत्येक-प्रश्नस्य कृते चत्वारः विकल्पाः प्रदत्ताः सन्ति।

3. सर्वे प्रश्नाः अनिवार्याः सन्ति ।

4. प्रत्येक-प्रश्नस्य कृते 1-1 अंकः निर्धारितः ।

खण्ड क (अपठित-अवबोधनम्)

निर्देशः-अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

"स्वच्छं भारतं प्रायः अधिकांशानां भारतीयानां स्वप्नः अस्ति परं स्वप्नमात्रेण तु स्वच्छता न भविष्यति । वयं सर्वे मिलित्वा अस्यां दिशायां प्रयासं कुर्याम। वयं पश्यामः यत् जनाः मार्गेषु अथवा सार्वजनिकेषु स्थानेषु यत्र कुत्रापि अवकरं क्षिपन्ति, किम् इदम् उचितम् अस्ति ? एतत् न करणीयम् यतः सर्वकारः एकाकी एव इदं कार्यं सफलं कर्तुं न शक्नोति। यदि वयम् अपि सहायतां करिष्यामः जागरूकाः च भविष्यामः तदा अयं स्वप्नः अवश्यमेव पूर्णः भविष्यति।"

1.जनाः मार्गेषु किं क्षिपन्ति ?

(क) कन्दुकम् (ख) पुस्तकम् (ग) वस्त्रम् (घ) अवकरम्

2. स्वच्छ भारतं केषां स्वप्नः अस्ति?

(क) भारतीयानाम् (ख) मुगलानाम् (ग) शिशूनाम् (घ) पशूनाम्

3. कः अवश्यमेव पूर्ण भविष्यति ?

(क) खेलनम् (ख) स्वप्नः (ग) धावनम् (घ) भोजनम्

4. कः एकाकी एव इदं कार्यं कर्तुं न शक्नोति?

(क) सर्वकारः (ख) श्रमिकः (ग) बालकः (घ) महिला

खण्ड ख (पठित-अवबोधनम्)

निर्देशः - अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखन्तु -

schools.aglasem.com

aglasem.com

“जीर्णधनः अवदत्-"भोः श्रेष्ठिन् ! नास्ति दोषस्ते, यदि तुला मूषकैः भक्षिता। ईदृशः एव अयं संसारः । न किञ्चिदत्रं शाश्वतमस्ति । परम् अहं नद्यां स्नानार्थं गमिष्यामि। तत् त्वम् आत्मीयं एनं शिशुं धनदेवनामानं मया सह स्नानोपकरणहस्तं प्रेषय " इति।"

5. तुला कैः भक्षिता ?

(क) वानरैः (ख) कुक्कुरैः (ग) मूषकैः (घ) श्रेष्ठिभिः

6. कः नद्यां स्नानार्थं गमिष्यति ?

(क) श्रेष्ठी (ख) मूषकः (ग) जीर्णधनः (घ) आत्मा

7. कीदृशः एव अयं संसारः?

(क) तादृशः (ख) मत्सदृशः (ग) ईदृशः (घ) त्वादृशः

8. "परम् अहं नद्यां स्नानार्थं गमिष्यामि " अत्र ‘अहम्’ इति कर्तृ-पदस्य क्रिया-पदम् किम् अस्ति?

(क) परम् (ख) नद्याम् (ग) स्नानार्थम् (घ) गमिष्यामि

निर्देशः- अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि विकल्पेभ्यः चित्वा लिखन्तु -

“प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः।

तस्माद् तदेव वक्तव्यं वचने का दरिद्रता ॥"

(9) जन्तवः केन प्रसीदन्ति?

(क) क्रोधेन (ख) वचनेन (ग) वक्तव्येन (घ) प्रियवाक्यप्रदानेन

(10) सर्वदा कीदृशं वाक्यं वक्तव्यम् ?

(क) प्रियवाक्यं (ख) दुष्टवाक्यम् (ग) कठोरवाक्यं (घ) व्यङ्गवाक्यम्

(11) वचने का न भवेत्?

(क) मधुरता (ख) दरिद्रता (ग) सुवचनम् (घ) सम्पन्नता

(12) 'जन्तवः' इति कर्तृपदस्य क्रियापदं किम् ?

(क) गमिष्यति (ख) तुष्यन्ति (ग) खादन्ति (घ) करिष्यन्ति

निर्देशः - अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

“चन्दनः - अस्तु गच्छ सखिभिः सह धर्मयात्रया आनन्दिता च भव। अहं सर्वमपि परिपालयिष्यमि।शिवास्ते सन्तु पन्थानः।

schools.aglasem.com

aglasem.com

चन्दनः- मल्लिका तु धर्मयात्रायै गता। अस्तु । दुग्धदोहनं कृत्वा ततः स्वप्रातराशस्य प्रबन्धं करिष्यामि। (स्त्रीवेषं धृत्वा दुग्धपात्रहस्तः नन्दिन्याः समीपं गच्छति)

उमा- मातुलानि! मातुलानि! "

13." अस्तु गच्छ सखिभिः सह...। " इति कः कथयति?

(क) उमा (ख) चन्दनः (ग) मल्लिका (घ) घनश्यामः

14. स्त्रीवेषं कः धारयति?

(क) चन्दनः (ख) उमा (ग) देवेशः (घ) गणेशः

15. मल्लिका कुत्र गता ?

(क) धर्मयात्रायै (ख) क्रीडनाय (ग) भ्रमणाय (घ) धावनाय

16. 'शिवास्ते सन्तु पन्थानः' अत्र क्रिया-पदं किमस्ति?

(क) शिवाः (ख) ते (ग) सन्तु (घ) पन्थानः

निर्देशः- रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-

17. **<u>वनवृक्षाः</u>** निर्विवेकं छिद्यन्ते ।

(क) केन (ख) कस्मिन् (ग) कम् (घ) के

18. **<u>तपोदत्तः</u>** कुटुम्बिभिः मित्रैः गर्वितः अभवत्।

(क) किम् (ख) कः (ग) का (घ) काम्

19. **<u>स्वर्णकाकं</u>** निवारयन्ती बालिका प्रार्थयत् ।

(क) कदा (ख) कथम् (ग) कम् (घ) कीदृशी

20. सः **<u>कल्पतरवे</u>** न्यवेदयत्।

(ग) कुत्र (क) कम् (ग) कस्मै (घ) केन

निर्देशः - अधोलिखित- वर्णानां उच्चारण - स्थानानि विकल्पेभ्यः चित्वा लिखन्तु-

21. 'नाटकम्' इत्यस्मिन् - पदे मूर्धन्यः वर्णःकः अस्ति ?

(क) न (ख) ट (ग) क (घ) म्

22. 'दन्तोष्ठ-वर्णः' कः वर्तते ?

(क) ट (ख) न (ग) त (घ) व

schools.aglasem.com

aglasem.com

23. 'फ' इत्यस्य उच्चारण-स्थानम् अस्ति -

(क) कण्ठः (ख) ओष्ठौ (ग) नासिका (घ) तालुः

निर्देशः - अधोलिखित - स्थूल-पदेषु सन्धिं विच्छेदं वा करणीयम् -

24. सज्जनः सदैव **<u>पर+उपकारं</u>** करोति ।

(क) परोपकारं (ख) परूपकारः (ग) परूउपकारं (घ) परूकारं

25. **<u>स्वागतं</u>** सः अकरोत् ।

(क) स्वा+गतं (ख) सु+आगतम् (ग) सो+आगतम् (घ) स्वे +आगतम्

26. तोयाः **<u>समुद्रमासाद्य</u>** अपेयाः भवन्ति ।

(क) समुद्रम्+आसाद्य (ख) समुद्र +मासाद्य (ग) समुद्रमा+साद्य (घ)समुद्रो +आसाद्य

निर्देशः - उचित-शब्द-रूपैः रिक्त-स्थानानि पूरयत -

27. - - - - - - - प्रकाशः सर्वत्र प्रसरति।

(क) भानुः (ख) भानोः (ग) भानवे (घ)भानुना

28. ----------कन्दुकं क्रीडन्ति ।

(क) बालाः (ख) बालम् (ग) बालेन (घ) बालात्

29. - - - - - - - नासिका वर्तते ।

(क) अयम् (ख) इयम् (ग) इदम् (घ) अस्य

निर्देशः - संख्यावाचक-शब्दैः वाक्यानि पूरयत -

30. क्षेत्रे - - - - - - -गजः अस्ति।

(क) एकः (ख) एकं (ग) एका (घ) एकाम्

31. विद्यालये - - - - - - - शिक्षिकाः सन्ति ।

(क) त्रीणि (ख) त्रि (ग) त्रयः (घ) तिस्रः

32. पुष्पपात्रे - - - - - - - पुष्पे स्तः।

(क) द्वि (ख) द्वौ (ग) द्वयोः (घ) द्वे

निर्देशः - उचित - धातुरूपैः वाक्यानि पूरयत -

33. छात्राः विद्यालयं - - - - - - ।

schools.aglasem.com

aglasem.com

(क) अगच्छत् (ख) अगच्छताम् (ग) अगच्छन् (घ) अगच्छः

34. श्रमिकाः परिश्रमं कृत्वा मुद्रां - - - - -।

(क) लभते (ख) लभन्ते (ग) लभे (घ) लभावहे

35. त्वम् पितरम् - - - - - -?

(क) सेवते (ख) सेवन्ते (ग) सेवसे (घ) सेवे

निर्देशः - उचित-उपपद-विभक्ति - माध्यमेन वाक्यानि पूरयत -

36. - - - - -परितः वनानि सन्ति ।

(क) ग्रामं (ख) ग्रामस्य (ग) ग्रामात् (घ) ग्रामाय।

37. नेतारः - - - - - - स्पृहयन्ति ।

(क) पदाय (ख) पदं (ग) पदात् (घ) पदेन

38. - - - - - - - - विना सुखं न भवति ।

(क) धर्मम् (ख) धर्मै (ग) धर्मस्य (घ) धर्मः

निर्देशः - स्थूल-पदेषु प्रकृति-प्रत्ययः करणीयः-

39. सः **<u>धावितुम्</u>** अभ्यासं करोति ।

(क) धाव्+क्त (ख) धाव्+तुमुन् (ग) धाव्+शतृ (घ) धाव् + क्त्वा

40. मया ग्रन्थः **<u>पठ्+क्त</u>**

(क) पठितुं (ख) पठितः (ग) पठतम् (घ) पठित्वा

schools.aglasem.com

AglaSem Earn while Learn Program. Send your papers and get paid.
Contact: support@aglasem.com aglasem.com